उमामहेश्वर स्तोत्रं

उमामहेश्वर स्तोत्रं

नमः शिवाभ्यां नवयौवनाभ्यां
परस्पराश्लिष्टवपुर्धराभ्यां |
नगेंद्रकन्यावृषकेतनाभ्यां
नमो नमः शंकरपार्वतीभ्यां || 1 ||

नमः शिवाभ्यां सरसोत्सवाभ्यां
नमस्कृताभीष्टवरप्रदाभ्यां |
नारायणेनार्चितपादुकाभ्यां
नमो नमः शंकरपार्वतीभ्यां || 2 ||

नमः शिवाभ्यां वृषवाहनाभ्यां
विरिंचिविष्णिवंद्रसुपूजिताभ्यां |
विभूतिपाटीरविलेपनाभ्यां
नमो नमः शंकरपार्वतीभ्यां || 3 ||

नमः शिवाभ्यां जगदीश्वराभ्यां
जगत्पतिभ्यां जयविग्रहाभ्यां |
जंभारिमुख्यैरभिवंदिताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 4 ||

नमः शिवाभ्यां परमौषधाभ्यां
पंचाक्षरीपंजररंजिताभ्यां |
प्रपंचसृष्टिस्थितिसंहृताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 5 ||

नमः शिवाभ्यामतिसुंदराभ्या-
-मत्यंतमासक्तहृदंबुजाभ्यां |
अशेषलोकैकहितंकराभ्यां
नमो नमः शंकरपार्वतीभ्यां || 6 ||

नमः शिवाभ्यां कलिनाशनाभ्यां
कंकालकल्याणवपुर्धराभ्यां |
कैलासशैलस्थितदेवताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 7 ||

नमः शिवाभ्यामशुभापहाभ्या-
-मशेषलोकैकविशेषिताभ्यां |
अकुंठिताभ्यां स्मृतिसंभृताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 8 ||

नमः शिवाभ्यां रथवाहनाभ्यां
रवींदुवैश्वानरलोचनाभ्यां |
राकाशशांकाभमुखांबुजाभ्यां
नमो नमः शंकरपार्वतीभ्यां || 9 ||

नमः शिवाभ्यां जटिलंधराभ्यां
जरामृतिभ्यां च विवर्जिताभ्यां |
जनार्दनाब्जोद्भवपूजिताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 10 ||

नमः शिवाभ्यां विषमेक्षणाभ्यां
बिल्वच्छदामल्लिकदामभृद्भ्यां |
शोभावतीशांतवतीश्वराभ्यां
नमो नमः शंकरपार्वतीभ्यां || 11 ||

नमः शिवाभ्यां पशुपालकाभ्यां
जगत्रयीरक्षणबद्धहृद्भ्यां |
समस्तदेवासुरपूजिताभ्यां
नमो नमः शंकरपार्वतीभ्यां || 12 ||

स्तोत्रं त्रिसंध्यं शिवपार्वतीभ्यां
भक्त्या पठेद्द्वादशकं नरो यः |
स सर्वसौभाग्यफलानि भुंक्ते
शतायुरांते शिवलोकमेति || 13 ||

इति श्रीमच्छंकराचार्यकृतं श्रीउमामहेश्वर स्तोत्रं संपूर्णं |